1816. ओ३म् पवमानस्य ते रसो दक्षो वि राजति द्युमान्। ज्योतिर्विश्वꣳ स्वर्दृशे ॥

1817. ओ३म् पवमानस्य ते रसो मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति ॥

1818. ओ३म् पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे॥

1819. ओ३म् पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत । सूर्यस्येव न रश्मयः ॥

1820. ओ३म् पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः॥

1821. ओ३म् पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या॥

1822. ओ३म् पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि॥

1823. ओ३म् पवमानास आशवः शुभ्रा असृग्रमिन्दवः । घ्नन्तो विश्वा अप द्विषः ॥

1824. ओ३म् पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ॥

1825. ओ३म् पवमानास इन्दवस्तिरः पवित्रमाशवः । इन्द्रं यामेभिराशत ॥

1826. ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥

1827. ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्॥

1828. ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्॥

1829. ओ३म् पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥

1830. ओ३म् पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः॥

1831. ओ३म् पवमानो असिष्यदद्रक्षांꣳस्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः ॥

1832. ओ३म् पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चन्द्रो मरुद्गणः ॥

1833. ओ३म् पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः॥

1834. ओ३म् पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित् । प्रजावद्रत्नमा भर ॥

1835. ओ३म् पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥

1836. **ओ३म्** पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥
1837. **ओ३म्** पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥
1838. **ओ३म्** पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा॥
1839. **ओ३म्** पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा॥
1840. **ओ३म्** पवस्व देववीरति पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषा विश॥
1841. **ओ३म्** पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या॥
1842. **ओ३म्** पवस्व विश्वचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः॥
1843. **ओ३म्** पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः॥
1844. **ओ३म्** पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः॥
1845. **ओ३म्** पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥
1846. **ओ३म्** पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥
1847. **ओ३म्** पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥
1848. **ओ३म्** पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥
1849. **ओ३म्** पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि॥
1850. **ओ३म्** पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥
1851. **ओ३म्** पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत॥
1852. **ओ३म्** पुनानासश्चमूषदो गच्छन्तो वायुमश्विना। ते नो धत्त सुवीर्यम्॥
1853. **ओ३म्** पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥
1854. **ओ३म्** पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः॥
1855. **ओ३म्** पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः॥
1856. **ओ३म्** पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युतानो वाजिभिर्यतः ॥
1857. **ओ३म्** पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः ॥
1858. **ओ३म्** पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥
1859. **ओ३म्** पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम्॥
1860. **ओ३म्** पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् । अध त्यं तुर्वशं यदुम् ॥
1861. **ओ३म्** पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्। अध त्यं तुर्वशं यदुम्॥
1862. **ओ३म्** प्र कविर्देववीतयेऽव्या वारेभिरव्यत। साह्वान्विश्वा अभि स्पृधः॥
1863. **ओ३म्** प्र गायत्रेण गायत पवमानं विचर्षणिम् । इन्दुं सहस्रचक्षसम् ॥
1864. **ओ३म्** प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः । अच्छा वाजं सहस्रिणम् ॥
1865. **ओ३म्** प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम् ॥

1866. **ओ३म्** प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ॥
1867. **ओ३म्** प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति ॥
1868. **ओ३म्** प्र धारा मधो अग्रियो महीरपो वि गाहते । हविर्हविःषु वन्द्यः ॥
1869. **ओ३म्** प्र न इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥
1870. **ओ३म्** प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥
1871. **ओ३म्** प्र पवमान धन्वसि सोमेन्द्राय मादनः । नृभिर्यतो वि नीयसे ॥
1872. **ओ३म्** प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥
1873. **ओ३म्** प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥
1874. **ओ३म्** प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥
1875. **ओ३म्** प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥
1876. **ओ३म्** प्र युजो वाचो अग्रियो वृषो अचिक्रदद्वने । सद्माभि सत्यो अध्वरः ॥
1877. **ओ३म्** प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने । सद्माभि सत्यो अध्वरः ॥
1878. **ओ३म्** प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥
1879. **ओ३म्** प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥
1880. **ओ३म्** प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥
1881. **ओ३म्** प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः । व्रता विदान आयुधा ॥
1882. **ओ३म्** प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृञ्जत ॥
1883. **ओ३म्** प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः ॥
1884. **ओ३म्** प्र सोम याहि धारया सुत इन्द्राय मत्सरः । दधानो अक्षिति श्रवः ॥
1885. **ओ३म्** प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत ॥
1886. **ओ३म्** प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु वृञ्जते ॥
1887. **ओ३म्** प्र सोमासो मदच्युतः श्रवसे नो मघोना म् । सुता विदथे अक्र मुः ॥
1888. **ओ३म्** प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुता विदथे अक्रमुः ॥
1889. **ओ३म्** प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः । वनानि महिषा इव ॥
1890. **ओ३म्** प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः । वनानि महिषा इव ॥
1891. **ओ३म्** प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥
1892. **ओ३म्** प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः । वीत्यर्ष पनिष्टये ॥
1893. **ओ३म्** प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥
1894. **ओ३म्** प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि ॥
1895. **ओ३म्** प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि ॥

1896. **ओ३म्** प्रास्य धारा अक्षरन्वृष्णः सुतस्याजसः । देवाꣳ अनु प्रभूषतः ॥

1897. **ओ३म्** प्रेष्ठं वो अतिथिꣳ स्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ॥

1898. **ओ३म्** बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥

1899. **ओ३म्** मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥

1900. **ओ३म्** मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥

1901. **ओ३म्** मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः ॥

1902. **ओ३म्** मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥

1903. **ओ३म्** मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ॥

1904. **ओ३म्** मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्यो वारेभिरस्मयुः ॥

1905. **ओ३म्** मर्मृजानास आयवो वृथा समुद्रमिन्दवः । अग्मन्नृतस्य योनिमा ॥

1906. **ओ३म्** महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥

1907. **ओ३म्** महो नो राय आ भर पवमान जही मृधः । रास्वेन्दो वीरवद्यशः ॥

1908. **ओ३म्** महो नो राय आ भर पवमान जही मृधः । रास्वेन्दो वीरवद्यशः ॥

1909. **ओ३म्** मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत्समुद्र आहितः ॥

1910. **ओ३म्** मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥

1911. **ओ३म्** मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥

1912. **ओ३म्** मो षु ब्रह्मेव तन्द्रयुर्भवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥

1913. **ओ३म्** ये आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् । ये वा जनेषु पञ्चसु ॥

1914. **ओ३म्** य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ॥

1915. **ओ३म्** यः सोमः कलशेष्वा अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ॥

1916. **ओ३म्** यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु । तन्नः पुनान आ भर ॥

1917. **ओ३म्** यत्सोमो वाजमर्षति शतं धारा अपस्युवः । इन्द्रस्य सख्यमाविशन् ॥

1918. **ओ३म्** यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः । द्रोणे सधस्थमश्नुषे ॥

1919. **ओ३म्** यदन्ति यच्च दूरके भयं विन्दति मामिह । पवमान वि तज्जहि ॥

1920. **ओ३म्** यमत्यमिव वाजिनं मृजन्ति योषणो दश । वने क्रीळन्तमत्यविम् ॥

1921. **ओ३म्** यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव । विश्वा च सोम सौभगा ॥

1922. **ओ३म्** यवंयवं नो अन्धसा पुष्टम्पुष्टं परि स्रव । सोम विश्वा च सौभगा ॥

1923. **ओ३म्** यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशꣳसहा ॥

1924. **ओ३म्** यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशꣳसहा ॥

1925. **ओ३म्** यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः । तेन नो मृळ जीवसे ॥

1926. ओ३म् यस्य ते सख्ये वयंःसासह्याम पृतन्यतः। तवेन्दो द्युम्न उत्तमे॥

1927. ओ३म् या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः॥

1928. ओ३म् यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः॥

1929. ओ३म् युवंः हि स्थः स्वःपती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः॥

1930. ओ३म् ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृडय॥

1931. ओ३म् ये सोमासः परावति ये अर्वावति सुन्विरे । ये वादः शर्यणावति ॥

1932. ओ३म् ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति॥

1933. ओ३म् यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥

1934. ओ३म् यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित् ॥

1935. ओ३म् यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्व्यः॥

1936. ओ३म् रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् । निदो यत्र मुमुच्महे ॥

1937. ओ३म् रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् । द्रुणा सधस्थमासदत् ॥

1938. ओ३म् रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत्॥

1939. ओ३म् रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥

1940. ओ३म् रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि ॥

1941. ओ३म् रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे । पवमानस्य मरुतः ॥

1942. ओ३म् रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे। पवमानस्य मरुतः ॥

1943. ओ३म् राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥

1944. ओ३म् राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे॥

1945. ओ३म् राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥

1946. ओ३म् राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते। यज्ञोउ न सप्त धातृभिः॥

1947. ओ३म् रायः समुद्रांःश्चतुरोऽस्मभ्यंः सोम विश्वतः। आ पवस्व सहस्रिणः ॥

1948. ओ३म् वरिवोधातमो भुवो मंःहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम्॥

1949. ओ३म् वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ॥

1950. ओ३म् वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः। दधन्विरे गभस्त्योः॥

1951. ओ३म् विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः । तना कृण्वन्तो अर्वते ॥

1952. ओ३म् विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। त्मना कृण्वन्तो अर्वतः॥

1953. ओ३म् विश्वस्मा इत्स्वर्दृशे साधारणंः रजस्तुरम्। गोपामृतस्य विर्भरत् ॥

1954. ओ३म् विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥

1955. ओ३म् वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् ॥

1956. **ओ३म्** वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥
1957. **ओ३म्** वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥
1958. **ओ३म्** वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥
1959. **ओ३म्** वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदत् ॥
1960. **ओ३म्** वृषा पुनान आयूꣳषि स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदः॥
1961. **ओ३म्** वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥
1962. **ओ३म्** वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे॥
1963. **ओ३म्** वृषा सोम द्युमाꣳअसि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे ॥
1964. **ओ३म्** वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम्॥
1965. **ओ३म्** वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम्॥
1966. **ओ३म्** वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः । दुहन्ति शक्मना पयः ॥
1967. **ओ३म्** वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः ॥
1968. **ओ३म्** वृष्णस्ते वृष्ण्यꣳशवो वृषा वनं वृषा सुतः। स त्वं वृषन्वृषेदसि॥
1969. **ओ३म्** शुचिः पावक उच्यते सोमः सुतः स मधुमान्। देवावीरघशꣳसहा ॥
1970. **ओ३म्** शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः । स्वदन्ति गावः पयोभिः ॥
1971. **ओ३म्** शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम्। स्वदन्ति गावः पयोभिः॥
1972. **ओ३म्** शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये॥
1973. **ओ३म्** शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥
1974. **ओ३म्** शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि॥
1975. **ओ३म्** स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यꣳ सह॥
1976. **ओ३म्** स देवः कविनेषितोऽभि द्रोणानि धावति। इन्दुरिन्द्राय मꣳहयन् ॥
1977. **ओ३म्** स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परिस्रव॥
1978. **ओ३म्** स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव॥
1979. **ओ३म्** स न ऊर्जे व्यऽव्ययं पवित्रं धाव धारया। देवासः शृणवन् हि कम्॥
1980. **ओ३म्** स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् । बर्हिष्माँ आ विवासति ॥
1981. **ओ३म्** स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥
1982. **ओ३म्** स नः पवस्व शं गवे शं जनाय शमर्वते। शꣳ राजन्नोषधीभ्यः ॥
1983. **ओ३म्** स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥
1984. **ओ३म्** स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः । वाजं जेषि श्रवो बृहत् ॥
1985. **ओ३म्** स नो अर्ष पवित्र आ मदो यो देववीतमः । इन्दविन्द्राय पीतये ॥

1986. **ओ३म्** स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥
1987. **ओ३म्** स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च ॥
1988. **ओ३म्** स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ॥
1989. **ओ३म्** स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर ॥
1990. **ओ३म्** स पवस्व धनंजय प्रयन्ता राधसो महः । अस्मभ्यं सोम गातुवित् ॥
1991. **ओ३म्** स पवस्व मदाय कं नृचक्षा देववीतये । इन्दविन्द्राय पीतये ॥
1992. **ओ३म्** स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः । इन्दविन्द्राय पीतये ॥
1993. **ओ३म्** स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः। एन्द्रस्य जठरं विश ॥
1994. **ओ३म्** स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवांꣳसं महीरपः॥
1995. **ओ३म्** स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥
1996. **ओ३म्** स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥
1997. **ओ३म्** स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत्॥
1998. **ओ३म्** स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः । इन्दुरत्यो विचक्षणः ॥
1999. **ओ३म्** स मर्मृजान आयुभिरिभो राजेव सुव्रतः । श्येनो न वंसु षीदति ॥
2000. **ओ३म्** स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न वꣳसु षीदति॥
2001. **ओ३म्** स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतम् ॥
2002. **ओ३म्** स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति॥
2003. **ओ३म्** स वाजी रोचनं दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम्॥
2004. **ओ३म्** स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥
2005. **ओ३म्** स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥
2006. **ओ३म्** स वायुमिन्द्रमश्विना साकं मदेन गच्छति। रणा यो अस्य धर्मणा॥
2007. **ओ३म्** स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत्॥
2008. **ओ३म्** स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ॥
2009. **ओ३म्** स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥
2010. **ओ३म्** स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्रक्षाꣳसि देवयुः॥
2011. **ओ३म्** स सुन्वे यो वसूनां यो रायामानेता य इळानाम् । सोमो यः सुक्षितीनाम् ॥
2012. **ओ३म्** स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् । महान्मही ऋतावृधा ॥
2013. **ओ३म्** स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा॥
2014. **ओ३म्** स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥
2015. **ओ३म्** स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम्॥

2016. ओ३म् सं देवैः शोभते वृषा कविउयोनावधि प्रियः । पवमानो अदाभ्यः ॥

2017. ओ३म् सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ॥

2018. ओ३म् संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् । शतं पुरो रुरुक्षणिम् ॥

2019. ओ३म् सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥

2020. ओ३म् सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥

2021. ओ३म् सना ज्योतिः सना स्वाऽविश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि ॥

2022. ओ३म् सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥

2023. ओ३म् सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥

2024. ओ३म् सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा । ज्योतिर्जज्ञानमुक्थ्यम् ॥

2025. ओ३म् समिन्द्रेणोत वायुना सुत एति पवित्र आ । सꣳ सूर्यस्य रश्मिभिः ॥

2026. ओ३म् समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ॥

2027. ओ३म् समीचीना अनूषत हरिꣳ हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥

2028. ओ३म् समीचीनास आशते होतारः सप्तजानयः । पदमेकस्य पिप्रतः ॥

2029. ओ३म् समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥

2030. ओ३म् समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ॥

2031. ओ३म् समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥

2032. ओ३म् समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥

2033. ओ३म् समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः । धेनूर्वाश्रो अवीवशत् ॥

2034. ओ३म् सम्मिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः । सीदञ्छ्येनो न योनिमा ॥

2035. ओ३म् सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः । सीदं च्छ्येनो न योनिमा ॥

2036. ओ३म् सहस्रोतिः शतामघो विमानो रजसः कविः । इन्द्राय पवते मदः ॥

2037. ओ३म् सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ॥

2038. ओ३म् सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥

2039. ओ३म् सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥

2040. ओ३म् सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमा अर्षन्तु विष्णवे ॥

2041. ओ३म् सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे । चारुं शर्धाय मत्सरम् ॥

2042. ओ३म् सुवितस्य वनामहेऽति सेतुं दुराय्यम् । साह्याम दस्युमव्रतम् ॥

2043. ओ३म् सुषहा सोम तानि ते पुनानाय प्रभूवसो । वर्धा समुद्रमुक्थ्य ॥

2044. ओ३म् सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया । सीदन्नृतस्य योनिमा ॥

2045. ओ३म् सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥

2046. ओ३म् सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥
2047. ओ३म् सोमा असृग्रमिन्दवः सुता ऋतस्य धारया । इन्द्राय मधुमत्तमाः ॥
2048. ओ३म् सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥
2049. ओ३म् सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् । सुवीरो अभिशस्तिपाः ॥
2050. ओ३म् स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति । यदी मर्मृज्यते धियः ॥
2051. ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥
2052. ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥
2053. ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥
2054. ओ३म् हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥
2055. ओ३म् हस्तच्युतेभिरद्रिभिः सुतꣳ सोमं पुनीतन । मधावा धावता मधु ॥
2056. ओ३म् हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् । अभि गिरा समस्वरन् ॥
2057. ओ३म् हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥
2058. ओ३म् हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥
2059. ओ३म् हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥
2060. ओ३म् हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत् । सीदन्तो वनुषो यथा ॥

53. पूजा देवता

2061. ओ३म् पूषन्तव व्रते वयं न रिष्येम कदा चन ।स्तोतारस्तऽइह स्मसि ॥

54. पूषा

2062. ओ३म् अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः ॥
2063. ओ३म् अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय । पणेश्चिद्वि म्रदा मनः ॥
2064. ओ३म् अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥
2065. ओ३म् अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् । दूरमधि स्रुतेरज ॥
2066. ओ३म् अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः ॥
2067. ओ३म् आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे । येन पितॄनचोदयः ॥
2068. ओ३म् आ पूषञ्चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं यथा पशुम् ॥
2069. ओ३म् आ रिख किकिरा कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रन्धय ॥
2070. ओ३म् आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥
2071. ओ३म् इमं च नो गवेषणं सातये सीषधो गणम् । आरात्पूषन्नसि श्रुतः ॥
2072. ओ३म् इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी । अस्माभिस्तुभ्यं शस्यते ॥
2073. ओ३म् उत नो गोषणिं धियमश्वसां वाजसामुत । नृवत्कृणुहि वीतये ॥

2074. ओ३म् उतं नो गोषणिं धियमश्वसां वाजसामुत । नृवत्कृणुह्यूतये ॥

2075. ओ३म् उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ॥

2076. ओ३म् एहि वां विमुचो नपादाघृणे सं सचावहै । रथीर्ऋतस्य नो भव ॥

2077. ओ३म् तां जुषस्व गिरं मम वाजयन्तीमवा धियम् । वधूयुरिव योषणाम् ॥

2078. ओ३म् न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥

2079. ओ३म् पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥

2080. ओ३म् पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥

2081. ओ३म् पूषा राजानमाघृणिरपगूळ्हं गुहा हितम् । अविन्दच्चित्रबर्हिषम् ॥

2082. ओ३म् माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥

2083. ओ३म् मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥

2084. ओ३म् य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे ॥

2085. ओ३म् यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः । तत्सु नो मन्म साधय ॥

2086. ओ३म् यो अस्मै हविषाविधन्न तं पूषापि मृष्यते । प्रथमो विन्दते वसु ॥

2087. ओ३म् यो नः पूषन्नघो वृको दुःशेव आदिदेशति । अप स्म तं पथो जहि ॥

2088. ओ३म् यो विश्वाभि विपश्यति भुवना सं च पश्यति । स नः पूषाविता भुवत् ॥

2089. ओ३म् रथीतमं कपर्दिनमीशानं राधसो महः । रायः सखायमीमहे ॥

2090. ओ३म् वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि ॥

2091. ओ३म् वि पथो वाजसातये चिनुहि वि मृधो जहि । साधन्तामुग्र नो धियः ॥

2092. ओ३म् वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् । अथेमस्मभ्यं रन्धय ॥

2093. ओ३म् शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम् । ईशानं राय ईमहे ॥

2094. ओ३म् सं पूषन्विदुषा नय यो अञ्जसानुशासति । य एवेदमिति ब्रवत् ॥

2095. ओ३म् समु पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥

55. पृथुश्रवसः कानीतस्य दानस्तुतिः

2096. ओ३म् दश श्यावा ऋधद्रयो वीतवारास आशवः । मथ्रा नेमिं नि वावृतुः ॥

56. प्रस्कण्वस्य दानस्तुतिः

2097. ओ३म् दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत ॥

2098. ओ३म् शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । मह्ना दिवं न तस्तभुः ॥

2099. ओ३म् सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ॥

57. फालमणिः, वनस्पतिः

2100. ओ३म् अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतः शिरः । अपि वृश्चाम्योजसा ॥

2101. **ओ३म्** तं धाता प्रत्यमुञ्चत स भूतं व्यकल्पयत्। तेन त्वं द्विषतो जहि ॥

2102. **ओ३म्** हिरण्यस्रगयं मणिः श्रद्धां यज्ञं महो दधत्। गृहे वसतु नोऽतिथिः ॥

58. बर्हिः

2103. **ओ३म्** स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणम् ॥

59. बृबुस्तक्षा

2104. **ओ३म्** यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी । सद्यो दानाय मंहते ॥

60. बृहस्पतिर्देवता

2105. **ओ३म्** यो रेवान् योऽअमीवहा वसुवित् पुष्टिवर्द्धनः। स नः सिषक्तु यस्तुरः ॥

61. ब्रह्मगवी

2106. **ओ३म्** अघ्न्ये प्र शिरो जहि ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥

2107. **ओ३म्** एवा त्वं देव्यघ्न्ये ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥

2108. **ओ३म्** सा ब्रह्मज्यं देवपीयुं ब्रह्मगव्यादीयमाना मृत्योः पड्वीष आ द्यति ॥

62. ब्रह्मणस्पतिः

2109. **ओ३म्** यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥

2110. **ओ३म्** सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तँ य औशिजः॥

63. मन्त्रोक्ताः

2111. **ओ३म्** अपि वृश्च पुराणवद्व्रततेरिव गुष्पितम्। ओजो दास्यस्य दम्भय ॥

64. मरुतः

2112. **ओ३म्** अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः । वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ॥

2113. **ओ३म्** अस्ति सोमो अयꣳ सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना॥

2114. **ओ३म्** अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु । उक्थं मदश्च शस्यते ॥

2115. **ओ३म्** आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम्॥

2116. **ओ३म्** आरे सा वः सुदानवो मरुत ऋञ्जती शरुः । आरे अश्मा यमस्यथ ॥

2117. **ओ३म्** उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी । अदेवत्रादराधसः ॥

2118. **ओ३म्** उत मे वोचतादिति सुतसोमे रथवीतौ । न कामो अप वेति मे ॥

2119. **ओ३म्** उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ॥

2120. **ओ३म्** उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे॥

2121. **ओ३म्** एतं मे स्तोममूर्म्ये दार्भ्याय परा वह । गिरो देवि रथीरिव ॥

2122. **ओ३म्** को वेद नूनमेषां यत्रा मदन्ति धूतयः । ऋतजाता अरेपसः ॥

2123. **ओ३म्** गृहमेधास आ गत मरुतो माप भूतन । युष्माकोती सुदानवः ॥
2124. **ओ३म्** गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् ॥ युक्ता वह्नी रथानाम् ॥
2125. **ओ३म्** जघने चोद एषां वि सक्थानि नरो यमुः । पुत्रकृथे न जनयः ॥
2126. **ओ३म्** तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् । अनु प्र यन्ति वृष्टयः ॥
2127. **ओ३म्** तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥
2128. **ओ३म्** ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः । आ यज्ञियासो ववृत्तन ॥
2129. **ओ३म्** परा वीरास एतन मर्यासो भद्रजानयः । अग्नितपो यथासथ ॥
2130. **ओ३म्** पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥
2131. **ओ३म्** प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषसः ॥
2132. **ओ३म्** मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥
2133. **ओ३म्** युवा स मारुतो गणस्त्वेषरथो अनेद्यः । शुभंयावाप्रतिष्कुतः ॥
2134. **ओ३म्** यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥
2135. **ओ३म्** यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया । श्रोतारो यामहूतिषु ॥
2136. **ओ३म्** शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥
2137. **ओ३म्** शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥
2138. **ओ३म्** सनत्साश्व्यं पशुमुत गव्यं शतावयम् । श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥
2139. **ओ३म्** सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥

65. मरुतः

2140. **ओ३म्** अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम् । अग्निं मित्रं न दर्शतम् ॥
2141. **ओ३म्** अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृञ्जते गिरः ॥
2142. **ओ३म्** आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥
2143. **ओ३म्** आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः । मरुतः सोमपीतये ॥
2144. **ओ३म्** इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥
2145. **ओ३म्** इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥
2146. **ओ३म्** उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥
2147. **ओ३म्** उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥
2148. **ओ३म्** उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः । उत्स्तोमैः पृश्निमातरः ॥
2149. **ओ३म्** कदत्विषन्त सूरयस्तिर आप इव स्रिधः । अर्षन्ति पूतदक्षसः ॥
2150. **ओ३म्** कुदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥
2151. **ओ३म्** कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ॥

2152. **ओ३म्** कद्ध नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥

2153. **ओ३म्** को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः । यत्सीमन्तं न धूनुथ ॥

2154. **ओ३म्** क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभि प्र गायत ॥

2155. **ओ३म्** गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चिन्नि येमिरे ॥

2156. **ओ३म्** तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । मरुतः सोमपीतये ॥

2157. **ओ३म्** त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥

2158. **ओ३म्** देवयन्तो यथा मतिमच्छा विदद्वसु गिरः । महामनूषत श्रुतम् ॥

2159. **ओ३म्** नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ ऋतस्य जिन्वथ ॥

2160. **ओ३म्** नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे । महे शुष्माय येमिरे ॥

2161. **ओ३म्** नि वो यामाय मानुषो दध्र उग्राय मन्यवे । जिहीत पर्वतो गिरिः ॥

2162. **ओ३म्** पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥

2163. **ओ३म्** प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥

2164. **ओ३म्** प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे । देवत्तं ब्रह्म गायत ॥

2165. **ओ३म्** मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥

2166. **ओ३म्** मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन ॥

2167. **ओ३म्** मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥

2168. **ओ३म्** यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥

2169. **ओ३म्** यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥

2170. **ओ३म्** ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः । अजायन्त स्वभानवः ॥

2171. **ओ३म्** येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥

2172. **ओ३म्** येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः । भिया यामेषु रेजते ॥

2173. **ओ३म्** वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् । अस्मे वृद्धा असन्निह ॥

2174. **ओ३म्** वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् । यद्यामं यान्ति वायुभिः ॥

2175. **ओ३म्** वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥

2176. **ओ३म्** सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः ॥

2177. **ओ३म्** सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे । ते भानुभिर्वि तस्थिरे ॥

66. मरुद्गणः

2178. **ओ३म्** अतः परिज्मन्ना गहि दिवो वा रोचनादधि। समस्मिन्नृञ्जते गिरः ॥

2179. **ओ३म्** अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति। गणैरिन्द्रस्य काम्यैः ॥

2180. **ओ३म्** आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ॥

2181. **ओ३म्** आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥
2182. **ओ३म्** इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥
2183. **ओ३म्** मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥
2184. **ओ३म्** यूयं नः प्रवतो नपान्मरुतः सूर्यत्वचसः । शर्म यच्छाथ सप्रथः ॥

67. मरूत इन्द्रश्च

2185. **ओ३म्** इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥
2186. **ओ३म्** वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥

68. मित्रः

2187. **ओ३म्** अभि यो महिना दिवं मित्रो बभूव सप्रथाः । अभि श्रवोभिः पृथिवीम् ॥
2188. **ओ३म्** मित्राय पञ्च येमिरे जना अभिष्टिशवसे । स देवान्विश्वान्बिभर्ति ॥

69. मित्रावरुणौ

2189. **ओ३म्** अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् ॥
2190. **ओ३म्** अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ॥
2191. **ओ३म्** आ नो गन्तं रिशादसा वरुण मित्र बर्हणा । उपेमं चारुमध्वरम् ॥
2192. **ओ३म्** आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू ॥
2193. **ओ३म्** आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत् । नि बर्हिषि सदतं सोमपीतये ॥
2194. **ओ३म्** उप नः सुतमा गतं वरुण मित्र दाशुषः । अस्य सोमस्य पीतये ॥
2195. **ओ३म्** उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥
2196. **ओ३म्** उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥
2197. **ओ३म्** ऋतमृतेन सपन्तेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धेते ॥
2198. **ओ३म्** ऋतमृतेन सपन्तेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धेते ॥
2199. **ओ३म्** ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥
2200. **ओ३म्** ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥
2201. **ओ३म्** ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥
2202. **ओ३म्** ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥
2203. **ओ३म्** कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥
2204. **ओ३म्** कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥
2205. **ओ३म्** गावऽउपावतावतं मही यज्ञस्य रप्सुदा ।उभा कर्णा हिरण्यया ॥
2206. **ओ३म्** गृणाना जमदग्निना योनावृतस्य सीदतम् । पातं सोममृतावृधा ॥
2207. **ओ३म्** गृणाना जमदग्निना योनावृतस्य सीदतम् । पातꣳ सोममृतावृधा ॥

2208. **ओ३म्** ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥

2209. **ओ३म्** तां नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥

2210. **ओ३म्** तां नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वा क्षत्रं देवेषु ॥

2211. **ओ३म्** तां वांꣳसम्यगद्रुह्वाणेषमश्याम धाम च । वयं वां मित्रा स्याम ॥

2212. **ओ३म्** ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ॥

2213. **ओ३म्** तां सम्राजां घृतासुती आदित्यां दानुनस्पती । सचेते अनवह्वरम् ॥

2214. **ओ३म्** पातं नो मित्रा पायुभिरुत त्रायेथाꣳसुत्रात्रा साह्याम दस्यू तनूभिः ॥

2215. **ओ३म्** पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा । तुर्याम दस्यून्तनूभिः ॥

2216. **ओ३म्** पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण । मित्र वंꣳसि वांꣳसुमतिम् ॥

2217. **ओ३म्** प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत् । अयःशीर्षा मदेरघुः ॥

2218. **ओ३म्** प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥

2219. **ओ३म्** मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः । मा शेषसा मा तनसा ॥

2220. **ओ३म्** मित्रं वयं हवामहे वरुणं सोमपीतये । जज्ञाना पूतदक्षसा ॥

2221. **ओ३म्** मित्रं वयंꣳ हवामहे वरुणंꣳ सोमपीतये । या जाता पूतदक्षसा ॥

2222. **ओ३म्** मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥

2223. **ओ३म्** मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् ।धियं घृताचीꣳ साधन्ता ॥

2224. **ओ३म्** मित्रंꣳहुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचींꣳसाधन्ता ॥

2225. **ओ३म्** यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥

2226. **ओ३म्** युवं दक्षं धृतव्रत मित्रावरुण दूळभम् । ऋतुना यज्ञमाशाथे ॥

2227. **ओ३म्** राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे । सहस्रस्थूण आशाते ॥

2228. **ओ३म्** वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥

2229. **ओ३म्** वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥

2230. **ओ३म्** विश्वस्य हि प्रचेतसा वरुण मित्र राजथः । ईशाना पिप्यतं धियः ॥

2231. **ओ३म्** वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः । बृहन्तं गर्तमाशाते ॥

2232. **ओ३म्** व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना । नि बर्हिषि सदतं सोमपीतये ॥

2233. **ओ३म्** सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥

70. रथवीतिर्दाल्भ्यः

2234. **ओ३म्** ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचन्त्यश्वान् । दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम् ॥

2235. **ओ३म्** एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥

2236. **ओ३म्** तत्सु वां॑ मित्रावरुणा महि॒त्वमी॒र्मा त॒स्थुषी॒रह॑भिर्दुदुह्रे । विश्वा॑: पिन्वथ॒: स्वस॑रस्य॒ धेना॒ अनु॑ वा॒मेक॑: प॒विरा व॑वर्त ॥

71. रात्रिस्तवः

2237. **ओ३म्** उप॑ ते॒ गा इ॒वाक॑रं वृणी॒ष्व दु॑हितर्दिवः । रात्रि॒ स्तोमं॒ न जि॒ग्युषे॑ ॥

2238. **ओ३म्** नि ग्रामा॑सो अविक्षत॒ नि प॒द्वन्तो॒ नि प॒क्षिण॑: । नि श्ये॒नास॑श्चिद॒र्थिन॑: ॥

2239. **ओ३म्** सा नो॑ अ॒द्य यस्या॑ व॒यं नि ते॒ याम॒न्नवि॑क्ष्महि । वृ॒क्षे न व॑स॒तिं वय॑: ॥

72. रुद्रः

2240. **ओ३म्** कद्रु॒द्राय॒ प्रचे॑तसे मी॒ळ्हुष्ट॑माय॒ तव्य॑से । वो॒चेम॒ शंत॑मं हृ॒दे ॥

2241. **ओ३म्** गा॒थप॑तिं मे॒धप॑तिं रु॒द्रं जला॑षभेषजम् । तच्छं॒योः सु॒म्नमी॑महे ॥

2242. **ओ३म्** यथा॑ नो॒ अदि॑ति॒: कर॒त्पश्वे॒ नृभ्यो॒ यथा॒ गवे॑ । यथा॑ तो॒काय॑ रु॒द्रिय॑म् ॥

73. रुद्रः, व्याघ्रः

2243. **ओ३म्** अ॒क्ष्यौ॑ च ते॒ मुखं॑ च ते॒ व्याघ्र॑ जम्भयामसि। आत्सर्वा॑न्विंश॒तिं न॒खान् ॥

74. वरुणः

2244. **ओ३म्** इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके ॥

2245. **ओ३म्** उदु॑त्त॒मं मु॑मुग्धि नो॒ वि पाशं॑ मध्य॒मं चृ॑त । अवा॑ध॒मानि॑ जी॒वसे॑ ॥

2246. **ओ३म्** क॒दा क्ष॑त्र॒श्रियं॒ नर॒मा वरु॑णं करामहे । मृ॒ळी॒काया॑रु॒चक्ष॑सम् ॥

2247. **ओ३म्** तदित्स॑मा॒नमा॑शाते॒ वेन॑न्ता॒ न प्र यु॑च्छतः । धृ॒तव्र॑ताय दा॒शुषे॑ ॥

2248. **ओ३म्** दर्शं॒ नु वि॒श्वद॑र्शतं॒ दर्शं॒ रथ॒मधि॒ क्षमि॑ । ए॒ता जु॑षत मे॒ गिर॑: ॥

2249. **ओ३म्** परा॑ मे यन्ति धी॒तयो॒ गावो॒ न गव्यू॑ती॒रनु॑ । इ॒च्छन्ती॑रु॒रुचक्ष॑सम् ॥

2250. **ओ३म्** परा॒ हि मे॒ विम॑न्यव॒: पत॑न्ति॒ वस्य॑इष्टये । वयो॒ न व॑स॒तीरुप॑ ॥

2251. **ओ३म्** बिभ्र॑द्द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् । परि॒ स्पशो॒ नि षे॑दिरे ॥

2252. **ओ३म्** मा नो॑ व॒धाय॑ ह॒त्नवे॑ जिहीळा॒नस्य॑ रीरधः । मा हृ॑णा॒नस्य॑ म॒न्यवे॑ ॥

2253. **ओ३म्** यच्चि॒द्धि ते॒ विशो॑ यथा॒ प्र दे॑व वरुण व्र॒तम् । मि॒नी॒मसि॒ द्यवि॑द्यवि ॥

2254. **ओ३म्** यु॒ञ्जाथा॒ꣳ रास॑भं यु॒वम॒स्मिन् यामे॑ वृषण्वसू। अ॒ग्निं भर॑न्तम॒स्म॒युम्॥

2255. **ओ३म्** वरु॑णः प्रावि॒ता भु॑वन्मि॒त्रो विश्वा॑भिरू॒तिभि॑: ।कर॑तां नः सु॒राध॑सः॥

2256. **ओ३म्** वि मृ॑ळी॒काय॑ ते॒ मनो॑ र॒थीरश्वं॒ न संदि॑तम् । गी॒र्भिर्व॑रुण सीमहि ॥

2257. **ओ३म्** स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् । प्र ण॒ आयूं॑षि तारिषत् ॥

75. वरुणमित्रार्यमणः

2258. **ओ३म्** मा वो॒ घ्नन्तं॒ मा शप॑न्तं॒ प्रति॑ वोचे देव॒यन्त॑म् । सु॒म्नैरिद्व॒ आ वि॑वासे ॥

2259. **ओ३म्** यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नू चित्स दभ्यते जनः ॥

76. वायुः

2260. **ओ३म्** उत वात पितासि न उत भ्रातोत नः सखा । स नो जीवातवे कृधि ॥

2261. **ओ३म्** उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि॥

2262. **ओ३म्** नियुत्वान्वायवा गह्ययंः शुक्रो अयामि ते। गन्तासि सुन्वतो गृहम्॥

2263. **ओ३म्** यददो वात ते गृहेऽ.ऽमृतं निहितं गुहा। तस्य नो धेहि जीवसे ॥

2264. **ओ३म्** वात आ वातु भेषजंः शम्भु मयोभु नो हृदे। प्र न आयूंषि तारिषत्॥

2265. **ओ३म्** वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्र ण आयूंषि तारिषत् ॥

2266. **ओ३म्** वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्।शिवो नियुद्भिः शिवाभिः॥

2267. **ओ३म्** वायो तव प्रपृञ्चती धेना जिगाति दाशुषे । उरूची सोमपीतये ॥

2268. **ओ३म्** वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥

2269. **ओ३म्** वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये॥

2270. **ओ३म्** स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः॥

77. विद्वांसो

2271. **ओ३म्** अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारंः सोमपीतये॥

2272. **ओ३म्** केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः॥

78. विद्वान्

2273. **ओ३म्** अभि यज्ञं गृणीहि नो ग्रावो नेष्टः पिबऽऋतुना। त्वहि रत्नधा ऽअसि॥

79. विश्वेदेवा ऋत्विजो वा

2274. **ओ३म्** इष्कृताहावमवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ॥

2275. **ओ३म्** सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥

80. विश्वेदेवाः

2276. **ओ३म्** अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि । पितुष्टे अस्मि वन्दिता ॥

2277. **ओ३म्** आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आ गहि ॥

2278. **ओ३म्** आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥

2279. **ओ३म्** इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥

2280. **ओ३म्** इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान्मारुतं गणम् ॥

2281. **ओ३म्** ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥

2282. **ओ३म्** उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः ॥

2283. **ओ३म्** ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये । देवेभिर्याहि यक्षि च ॥

2284. **ओ३म्** ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतम् ॥
2285. **ओ३म्** कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥
2286. **ओ३म्** घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥
2287. **ओ३म्** जयतामिव तन्यतुर्मरुतामेति धृष्णुया । यच्छुभं याथना नरः ॥
2288. **ओ३म्** तत्सु नः सविता भगो वरुणो मित्रो अर्यमा । इन्द्रो नो राधसा गमत् ॥
2289. **ओ३म्** ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा । वृधासश्च प्रचेतसः ॥
2290. **ओ३म्** ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः । व्रता रक्षन्ते विश्वाहा ॥
2291. **ओ३म्** देवानामिदवो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥
2292. **ओ३म्** न देवानामति व्रतं शतात्मा चन जीवति । तथा युजा वि वावृते ॥
2293. **ओ३म्** प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥
2294. **ओ३म्** मधु नक्तमुतोषसो मधुमत् पार्थिव९ रजः । मधु द्यौरस्तु नः पिता ॥२८॥
2295. **ओ३म्** मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥
2296. **ओ३म्** मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः । मान्त स्थुर्नो अरातयः ॥
2297. **ओ३म्** यस्य प्रस्वादसो गिर उपमश्रवसः पितुः । क्षेत्रं न रण्वमूचुषे ॥
2298. **ओ३म्** यस्य मा हरितो रथे तिस्रो वहन्ति साधुया । स्तवै सहस्रदक्षिणे ॥
2299. **ओ३म्** यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ॥
2300. **ओ३म्** ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् । विदन्नह द्वितासनन् ॥
2301. **ओ३म्** येन देवा असुराणामोजांस्यवृणीध्वम् । तेना नः शर्म यच्छत ॥
2302. **ओ३म्** यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥
2303. **ओ३म्** वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ॥
2304. **ओ३म्** वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः । पत्नीवन्तो वषट्कृताः ॥
2305. **ओ३म्** वामस्य हि प्रचेतस ईशानाशो रिशादसः । नेमादित्या अघस्य यत् ॥
2306. **ओ३म्** विप्रेभिर्विप्र सन्त्य प्रातर्यावभिरा गहि । देवेभिः सोमपीतये ॥
2307. **ओ३म्** विश्वान्देवान्हवामहे मरुतः सोमपीतये । उग्रा हि पृश्निमातरः ॥
2308. **ओ३म्** विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥
2309. **ओ३म्** विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥
2310. **ओ३म्** विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः । उस्रा इव स्वसराणि ॥
2311. **ओ३म्** विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥
2312. **ओ३म्** स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषन्त नः ॥

81. विष्णुः

2313. **ओ३म्** अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त धामभिः ॥
2314. **ओ३म्** इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुले॥
2315. **ओ३म्** इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुले॥
2316. **ओ३म्** इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे ॥
2317. **ओ३म्** तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥
2318. **ओ३म्** तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते।विष्णोर्यत्परमं पदम्॥
2319. **ओ३म्** तद्विप्रासो विपन्युवो जागृवांꣳसः समिन्धते। विष्णोर्यत्परमं पदम्॥
2320. **ओ३म्** तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥
2321. **ओ३म्** तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥
2322. **ओ३म्** तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥
2323. **ओ३म्** त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥
2324. **ओ३म्** त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। इतो धर्माणि धारयन् ॥
2325. **ओ३म्** दिवो विष्ण उत वा पृथिव्या महो विष्ण उरोरन्तरिक्षात्। हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ॥
2326. **ओ३म्** विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥
2327. **ओ३म्** विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥

82. वैश्वानरः

2328. **ओ३म्** वैश्वानरो न आगमदिमं यज्ञं सजूरुप। अग्निरुक्थेष्वंहसु ॥
2329. **ओ३म्** वैश्वानरो न ऊतय आ प्र यातु परावतः। अग्निर्नः सुष्टुतीरुप ॥
2330. **ओ३म्** वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत्। एषु द्युम्नं स्वर्यमत् ॥

83. शशीयशी

2331. **ओ३म्** उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः । स वैरदेय इत्समः ॥
2332. **ओ३म्** उत मेऽरपद्युवतिर्ममन्दुषी प्रति श्यावाय वर्तनिम् । वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥
2333. **ओ३म्** यो मे धेनूनां शतं वैददश्विर्यथा ददत् । तरन्त इव मंहना ॥

84. संस्फानम्

2334. **ओ३म्** अयं नो नभसस्पतिः संस्फानो अभि रक्षतु। असमातिं गृहेषु नः ॥
2335. **ओ३म्** त्वं नो नभसस्पत ऊर्जं गृहेषु धारय। आ पुष्टमेत्वा वसु ॥

85. सदसस्पतिः

2336. **ओ३म्** यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ॥

86. सदसस्पतिर्नराशंसो वा

2337. **ओ३म्** नराशंसं सुधृष्टमपश्यं सप्रथस्तमम् । दिवो न सद्ममखसम् ॥

87. सरस्वती

2338. **ओ३म्** उतं नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् ॥
2339. **ओ३म्** उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिम् ॥
2340. **ओ३म्** पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥
2341. **ओ३म्** पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥
2342. **ओ३म्** महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥
2343. **ओ३म्** महोऽअर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥
2344. **ओ३म्** यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ॥
2345. **ओ३म्** शिवा नः शंतमा भव सुमृडीका सरस्वति । मा ते युयोम संदृशः ॥

88. सरस्वान्

2346. **ओ३म्** जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तꣳहवामहे ॥

89. सविता

2347. **ओ३म्** आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ॥
2348. **ओ३म्** उभाभ्यां देव सवितः पवित्रेण सवेन च । अस्मान्पुनीहि चक्षसे ॥
2349. **ओ३म्** तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
2350. **ओ३म्** तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
2351. **ओ३म्** देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः । नमस्यन्ति धियेषिताः ॥
2352. **ओ३म्** देवस्य चेततो महीं प्र सवितुर्हवामहे । सुमतिꣳ सत्यराधसम् ॥
2353. **ओ३म्** य इमा विश्वा जातान्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥
2354. **ओ३म्** य इमे उभे अहनी पुर एत्यप्रयुच्छन् । स्वाधीर्देवः सविता ॥
2355. **ओ३म्** विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥
2356. **ओ३म्** विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥
2357. **ओ३म्** विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥
2358. **ओ३म्** विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्नऽआ सुव ॥
2359. **ओ३म्** सखाय आ नि षीदत सविता स्तोम्यो नु नः । दाता राधांसि शुम्भति ॥
2360. **ओ३म्** सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु । तस्मै युज्यन्तामुस्रियाः ॥
2361. **ओ३म्** सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे । प्र देवाय मतीविदे ॥
2362. **ओ३म्** हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥

2363. ओ३म् हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदम्॥

90. सविता भगो वा

2364. ओ३म् अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन्भागमीमहे ॥

2365. ओ३म् भगभक्तस्य ते वयमुदशेम तवावसा । मूर्धानं राय आरभे ॥

2366. ओ३म् यश्चिद्धि तं इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ॥

91. सार्पराज्ञी सूर्यो वा

2367. ओ३म् त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते । प्रति वस्तोरह द्युभिः ॥

92. सावर्णेर्दानस्तुतिः

2368. ओ३म् उत दासा परिविषे स्मद्दिष्टी गोपरीणसा । यदुस्तुर्वश्च मामहे ॥

93. सूर्यः

2369. ओ३म् अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥

2370. ओ३म् अदृश्रन्नस्य केतवो वि रश्मयो जनाँ३अनु। भ्रा जन्तो अग्नयो यथा॥

2371. ओ३म् अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥

2372. ओ३म् अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम्॥

2373. ओ३म् अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे॥

2374. ओ३म् अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ॥

2375. ओ३म् अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः। ताभिर्याति स्वयुक्तिभिः ॥

2376. ओ३म् अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः। ताभिर्याति स्वयुक्तिभिः॥

2377. ओ३म् आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः॥

2378. ओ३म् उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥

2379. ओ३म् उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः। पश्यञ्जन्मानि सूर्य॥

2380. ओ३म् चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः ॥

2381. ओ३म् तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचन ॥

2382. ओ३म् तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम्॥

2383. ओ३म् त्रि२शषद्धाम वि राजति वाक्पतङ्गाय धीयते। प्रति वस्तोरह द्युभिः॥

2384. ओ३म् प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। स्वर्दृशे॥

2385. ओ३म् प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषीः। प्रत्यङ्विश्वं स्वर्दृशे ॥

2386. ओ३म् येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ॥

2387. **ओ३म्** येना पावक चक्षसा भुरण्यन्तं जनाअनु । त्वं वरुण पश्यसि ॥
2388. **ओ३म्** वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः । पश्यं जन्मानि सूर्य ॥
2389. **ओ३म्** सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥
2390. **ओ३म्** सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षणम् ॥

94. सोमः

2391. **ओ३म्** अर्थिनो यन्ति चेदर्थं गच्छानिद्दुषो रातिम् । ववृज्युस्तृष्यतः कामम् ॥
2392. **ओ३म्** अस्माकमायुर्वर्धयन्नभिमातीः सहमानः । सोमः सधस्थमासदत् ॥
2393. **ओ३म्** अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥
2394. **ओ३म्** इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव ॥
2395. **ओ३म्** गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥
2396. **ओ३म्** त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद्द्वेषः ॥
2397. **ओ३म्** द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत ।नेष्ट्राद्दतुभिरिष्यत ॥
2398. **ओ३म्** पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥
2399. **ओ३म्** मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥
2400. **ओ३म्** मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥
2401. **ओ३म्** येन सोम साहन्त्यासुरान्रन्धयासि नः । तेना नो अधि वोचत ॥
2402. **ओ३म्** वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥
2403. **ओ३म्** सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ॥
2404. **ओ३म्** सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ॥
2405. **ओ३म्** सोमो जिगाति गातुविद्देवानामेति निष्कृतम् । ऋतस्य योनिमासदम् ॥
2406. **ओ३म्** स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥